**A** समग्रशिक्षा केरलम् **611**

## आत्यन्तिकमूल्यनिर्णयः-I 2025-26

| | | |
|---|---|---|
| कक्ष्या - षष्ठी | **संस्कृतम्** | समयः - सपादहोराद्वयम् |
| Std - VI | **SANSKRIT** | Time - 2¼ Hrs |

**निर्देशाः**

उत्तरलेखनात् पूर्वं छात्राणां कृते समाश्वासरूपेण 15 निमेषाः प्रदत्ताः। उत्तरलेखनाय देवनागरीलिपिः उपयोक्तव्या। षट् प्रवर्तनानि निश्चयेन करणीयानि। तत्र प्रवर्तनद्वयस्य विकल्पः अस्ति। प्रतिविकल्पस्य एकं प्रवर्तनं नूनं समाधेयम्।

---

### प्रवर्तनम् १

**क) वाक्यात् पदं स्वीकृत्य चित्रानुसारं नामानि लिखतु।**

1) ग्रन्थालये पुस्तकम् अस्ति।  ...............................

2) सङ्गणकप्रकोष्ठे सङ्गणकम् अस्ति।  ...............................

3) पाचकशालायां पात्रम् अस्ति।  ...............................

4) कक्ष्यायां कृष्णफलकम् अस्ति।  ...............................

**ख) उचितः गणः कः?**

| | | |
|---|---|---|
| 1) त्रिचक्रिका, | महानौका, | माला |
| 2) चषकः, | पुस्तकम्, | द्विचक्रिका |
| 3) लेखनी, | अङ्कनी, | नदी |
| 4) अध्यापिका, | छात्रा, | वैद्या |

A) 1, 2, 3 साधु


B) 2, 3, 4 साधु

C) 1, 3, 4 साधु

D) 1, 2, 4 साधु

प्रवर्तनम् २

क) चित्रस्य आशयानुसारम् उचितं सुभाषितं चित्वा लिखतु।



ऐक्यं बलं समाजस्य
तदभावे स दुर्बलः।
तस्मादैक्यं प्रशंसन्ति
दृढं राष्ट्रहितैषिणः।।

सर्वः सर्वं न जानाति
सर्वज्ञो नास्ति कश्चन।
नैकत्र परिनिष्ठास्ति
ज्ञानस्य पुरुषे क्वचित्।।

ख) '<u>शास्त्रं जानाति</u>' इति वाक्यस्य एकपदं लिखतु।

ग) 'कुर्यादद्यैव' इति पदस्य उचितं पदच्छेदं चित्वा लिखतु।

A) कुर्या + दद्य + एव

B) कुर्याद + द्यै + व

C) कुर्यात् + अद्य + एव

D) कुर्याददै + व

**प्रवर्तनम् ३**

**क) वार्तां पठित्वा उत्तराणि लिखतु।**

**शुभांशु शुक्ला बहिराकाशनिलयं (ISS) गतवान्।**

नवदेहली- बहिराकाशं गन्तुम् अन्ताराष्ट्रियबहिराकाशनिलयं प्रविष्टः प्रथमः भारतीयः भवति शुभांशु शुक्ला। ड्रागण् बहिराकाशपेटके एव सः गतवान्। आक्सियन् 'मिषन् 4' इति अस्य दौत्यस्य नाम आसीत्।

1) बहिराकाशदौत्यस्य नाम किम्?

2) कस्मिन् पेटके सः अगच्छत्?

3) अन्ताराष्ट्रियबहिराकाशनिलयं प्रविष्टः प्रथमः भारतीयः कः?

4) खण्डिकायाः तुमुन्नन्तपदं चित्वा लिखतु।

**ख) उचिता प्रस्तावना का ?**

1) आर्यभटीयस्य कर्ता भवति आर्यभटः।

2) भारतस्य प्रथमः कृत्रिमोपग्रहः भवति आर्यभट्ट।

A) 1 एव साधु

B) 2 एव साधु

C) 1, 2 उभयमपि साधु

D) 1, 2 उभयमपि असाधु

**प्रवर्तनम् ४ A**

**सम्भाषणं पठित्वा कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानं पूरयतु।**

(क्षेत्रपतिः, काकः, मित्रं, शयनं, जालं)

(कथं रक्षां प्राप्तवान् इति हरिणः बकस्य समीपं वदति)

बकः - मित्र ! भवान् कथं रक्षां प्राप्तवान् ?

हरिणः - अहं मृत इव ..........कृतवान्।

बकः - ततः किम् ?

हरिणः - यदा .......... शब्दं कृतवान् तदा धावितवान्।

बकः - अनन्तरं किमभवत् ?

हरिणः - ...........आगत्य ..........कर्तितवान्।

बकः - तदा किं कृतवान् ?

हरिणः - तदा अहं धावितवान् ।

बकः - आपत्काले ...........मित्रं भवति।

हरिणः - सत्यमेव।


अथवा


**प्रवर्तनम् ४ B**

**चित्रानुसारं कथायाः आशयं लिखतु।**

हरिणः मृत इव शयनं कृतवान्। काकः शब्दं कृतवान्, हरिणः धावितवान्।
हरिणः जाले बद्धः। हरिणः क्षेत्रम् आगत्य व्रीहिम् अखादत्।
एकदा कश्चन जम्बूकः तत्र आगतवान्।

1  ..............................................

2  ..............................................

3  ..............................................

4  ..............................................

5  ..............................................

प्रवर्तनम् ५

क) चित्रानुसारं पादटिप्पणीं लिखतु।

(बालिका मालां धरति। माता पत्रिकां पठति।

पिता दूरवाणीं करोति। बालकः द्विचक्रिकां क्षालयति।)




ख) अनुचितं गणं लिखतु।

1) शशी – चन्द्रः

2) सूर्यः – आदित्यः

3) तमः – प्रकाशः

A) 1, 3

B) 2, 3

C) 2 एव

D) 3 एव

**प्रवर्तनम् ६ A**

**क) खण्डिकायाः संख्यापदं चित्वा उचितस्थाने लिखतु।**

कुटुम्बश्री पद्धतितः काञ्चन महिलाः धनं स्वीकरोति। मल्लिका सहस्रं स्वीकरोति। रसिया अयुतं प्राप्नोति। अन्नम्मा नियुतं स्वीकरोति। श्रीकला प्रयुतं प्राप्नोति।

100000 - ........................

1000 - ........................

10000 - ........................

1000000 - ........................

**ख) यदा-तदा उपयुज्य वाक्यं परिवर्त्य लिखतु।**

रोगः आगच्छति। औषधं स्वीकरोति।

................................................

**अथवा**

**प्रवर्तनम् ६ B**

**क) चान्द्रदिनमधिकृत्य एकां भित्तिपत्रिकां निर्मातु।**